| अस्थापयत्, रज्ज्वा, पुत्रान्, सरलतया |

4. **अधोलिखितेषु एकं विषयम् अधिकृत्य पञ्चवाक्येषु एकम् अनुच्छेदं लिखत** 1 x 5 = 5
**नीचे लिखे विषयों में से किसी एक पर पांच वाक्यों का अनुच्छेद लिखें**
**Write a passage of five sanskrit sentences on any one of the following topics**

(i) मम माता

(ii) मम वाटिका

(iii) मम संस्कृतपुस्तकम्

# खण्डः 'ग' (Section C)

# अनुप्रयुक्तव्याकरणम् 30

# (Applied Grammar)

5. **अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानां सन्धिविच्छेदं कुरुत** 1 x 6 = 6
**नीचे लिखे वाक्यों में स्थूलाक्षरपदों में सन्धिच्छेद करें**
**Disjoin Sandhi in the bold typed words in the following sentences**

(i) **अचिराच्च** तारकितं वियत् अराजत।

(ii) **ऋतावृतौ** नृभिः किं सेव्यं किं च न सेव्यम् इति चरकसंहितायां निर्दिष्टम्।

(iii) कुसुमपाण्डुरैः **हंसैरिव** चन्द्रपादैः कुमुदसरांसि अगाह्यन्त।

(iv) इयं वनदेवता **पल्लवार्घ्येण** माम् उपतिष्ठते।

(v) शरदि **सहसैव** अर्करश्मिभिः प्रायः पित्तं कुप्यति।

(vi) केशव धृतबुद्धशरीर! जय **जगदीश** हरे।

6. **अधोलिखितेषु स्थूलाक्षरपदानां विग्रहं कृत्वा लिखत** 1 x 6 = 6
**नीचे लिखे वाक्यों में स्थूलाक्षरपदों में विग्रह करके लिखें।**
**Disjoin compounds in bold typed words in the following sentences**

(i) **चन्द्रोदयः** पाठः कादम्बरीतः सङ्कलितः।

(ii) **निर्मलगुणाः** सज्जनेषु वसन्ति।

(iii) पक्षिणः **क्षीणफलं** वृक्षं त्यजन्ति।

(iv) वाल्मीकि–आश्रमे **अध्ययनप्रत्यूहः** आसीत् अतः आत्रेय्या दीर्घप्रवासः अङ्गीकृतः।

(v) एनं **बालमृगेन्द्रं** मुञ्च।

(vi) इदं वनं **यथेच्छम्** भोग्यम्।

**7. कोष्ठकान्तर्गतं प्रकृतिं प्रत्ययं च योजयित्वा वाक्यानि पुनः लिखत** 1 x 8 = 8

**कोष्ठक के अन्तर्गत प्रकृति और प्रत्यम जोड़कर वाक्य पुनः लिखें**

**Rewrite the sentences after adding suffixes to the roots and words given in the brackets**

(i) अनेन च समयेन (परि+नम्+क्त) --------- दिवसः।

(ii) प्रणामाञ्जलिसलिलैः (क्षाल्+कर्मवाच्य+शानच्)-------- इवागलत् संध्यारागः।

(iii) प्रलयपयोधिजले वेदं (धृ+क्तवतु)--------- असि।

(iv) पौलस्त्यं (जि+शतृ) -------- कृष्णाय नमः।

(v) क्वापि (वि+हृ+ल्यप्) --------- दिवसावसाने तपोवनधेनुः आश्रमपदम् आगच्छत्।

(vi) तिमिरं सर्वम् अन्यत् (अन्धकार+तल्) ---------- अनयत्।

(vii) शीते (बल+इन्)----------- वायोः रसं हिनस्ति।

(viii) शनैः शनैः च समुदिते ----------- (भग+वतुप्) हिमस्रुति सकलं जगत् अराजत।

**8. कोष्ठकप्रदत्तशब्दानाम् उचितरूपैः रिक्त–स्थानानां पूर्तिः क्रियताम्** 1 x 5 = 5

**कोष्ठक में दिए गए शब्दों के शुद्धरूपों से रिक्तस्थानपूर्ति करें**

**Fill in the blanks with the suitable words in the brackets**

(i) हर्षवर्धनः पितुः समीपम् -----------। (अगच्छन्/अगच्छत्)

(ii) हे केशव! त्वं कल्किशरीरम् अवधार्य करवालं ---------। (कलयति/कलयसि)

(iii) वर्षासु अग्निबले क्षीणे ------------ पवनादयः। (कुप्यन्ति/कुप्यति)

(iv) अहम् तुभ्यम् एकं क्रीडनकं -------------। (दास्यति/दास्यामि)

(v) भवान् सतां सङ्गं -----------। (करोतु/कुरु)

**9. कोष्ठकगतपदेषु उचितविभक्तिं प्रयुज्य वाक्यानि पूरयत** 1 x 5 = 5

**कोष्ठक में दिए गए शब्दों के साथ उचित विभक्ति लगाकर वाक्य पूरे करें**

**Fill in the blanks with the words given in the brackets after putting a suitable case-ending with them**

(i) अस्मिन् बाले औरस इव ----------- मे मनः स्निह्यति। (पुत्र)

(ii) ----------- विना योगिनः बुधैः शीघ्रं मुच्यन्ते। (ज्ञान)

(iii) रोचते ----------- एषः मयूरः। (अस्मद्)

(iv) क्रमेण अमृतदीधितिः ------------ च अध्यतिष्ठत्। (गगनतल)

(v) पिशुनता यदि अस्ति ----------- किम्? (पातक)

# खण्डः 'घ' 45 (Section D)
# भागः (I) (Part - I)
# पठितांश–अवबोधनम् 35
# (Text Book)

**10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत** **6**

**नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दें**

**Answer the questions after reading the following passage**

क्षणमात्रं च स्थित्वा पित्रा पुनराहारार्थम् आदिश्यमानः धवलगृहादवततार। गत्वा च स्वधाम कतिचित् कवलान् अगृह्णात्। आचमंश्च चामरग्राहिणम् आदिदेश–विज्ञाय आगच्छ कथमास्ते तात इति। गत्वा च प्रतिनिवृत्य च देव! तथैव, इति विज्ञापितः सर्वानाहूय उपह्वरे वैद्यान् पप्रच्छ–किमस्मिन् एवंविधे विधेयमधुना इति?' तेषां मध्ये रसायनो नाम युवा वैद्यकुमारः सास्रस्तूष्णीम् अधोमुखोऽभूत्। पृष्टश्च सोऽब्रवीत् देव! श्वः प्रभाते यथावस्थितम् आवेदयिष्यामि' इति। गतेषु च भिषक्षु क्षतधृतिः पितुः समीपमेव पुनरगात्। तत्र च पितुः आलापान् आकर्णयन् दूयमानहृदयः दुःखदीर्घा जाग्रदेव निशामनैषीत्।

**I एकपदेन उत्तरत** **½ x 4 = 2**

**एक शब्द में उत्तर दें**

**Answer in one word only**

(i) केन पुनराहारार्थम् आदिश्यमानः हर्षवर्धनः धवलगृहादवततार?

(ii) सः कान् आहूय उपह्वरे पप्रच्छ?

(iii) वैद्यकुमारस्य किं नाम आसीत्?

(iv) हर्षवर्धनः कस्य आलापान् आकर्णयन् जाग्रदेव निशाम् अनैषीत्?

**II पूर्णवाक्येन उत्तरत** **1 x 2 = 2**

**पूरे वाक्य में उत्तर दें**

**Answer in a complete sentence**

(i) स्वधाम गत्वा सः किम् अकरोत्?

(ii) पृष्टः वैद्यकुमारः किमकथयत्?

III ‘दु:खदीर्घाम्’ इति पदं कस्य विशेषणम्? 1

IV ‘तेषां मध्ये’ इत्यत्र तेषां पदं कस्मै प्रयुक्तम्? 1

**अथवा (या) (OR)**

**अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत** **6**
**नीचे लिखे नाट्यांश को पढ़कर प्रश्नों के उत्तर दें**
**Read the extract from the play and answer the questions given below**

बाल: जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये।

प्रथमा अविनीत! किं नोऽपत्यनिर्विशेषणि सत्त्वानि विप्रकरोषि। हन्त! वर्धते ते संरम्भ:। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।

दुष्यन्त: किं नु खलु बालेऽस्मिन् औरस इव पुत्रे स्निह्यति मे मन:। नूनमनपत्यता मां वत्सलयति।

द्वितीया एषा खलु केसरिणी त्वां लङ्घयति यद्यस्या: पुत्रकं न मुञ्चसि।

बाल: (सस्मितम्) अहो बलीय: खलु भीतोऽस्मि। (इत्यधरं दर्शयति)

प्रथमा वत्स! एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।

बाल: कुत्र, देहि तत्। (इति हस्तं प्रसारयति)

द्वितीया सुव्रते। न शक्य एष वाचामात्रेण विरमयितुम्। गच्छ त्वम्। मदीये उटजे मृत्तिकामयूरस्तिष्ठति। तमस्योपहर।

**I** **एकपदेन उत्तरत** **½ x 4 = 2**
**एक शब्द में उत्तर दें**
**Answer in one word only**

(i) बाल: ‘सर्वदमन’ इति केन कृतनामधेयोऽस्ति?

(ii) प्रथमा तापसी बालं किम् मोक्तुं कथयति?

(iii) बाल: केन विरमयितुं न शक्य:?

(iv) मृत्तिकामयूर: कुत्र तिष्ठति?

**II** **पूर्णवाक्येन उत्तरत** **1 x 2 = 2**
**पूरे वाक्य में उत्तर दें**
**Answer in a complete sentence**

(i) तापसी बालक्रीडार्थं तस्मै किं दत्तवती?

(ii) दुष्यन्तस्य मन: तस्मिन् बाले किमिव स्निह्यति?

III ‘अपत्यता’ इत्यस्य क: विलोम: अत्र प्रयुक्त:? 1

IV ‘दन्तांस्ते गणयिष्ये अत्र ते ‘इति’ पदं कस्मै प्रयुक्तम्? 1

11. **अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत** **6**

**नीचे लिखे श्लोक को पढ़ कर प्रश्नों के उत्तर दें**

**Read the following Shloka and answer the questions given below**

निःस्वो वष्टिशतं, शती दशशतं, लक्षं सहस्राधिपो,
लक्षेशः क्षितिपालतां, क्षितिपतिश्चक्रेशतां वाञ्छति।
चक्रेशः पुनरिन्द्रतां, सुरपतिर्ब्राह्मं पदं वाञ्छति,
ब्रह्मा शैवपदं, शिवो हरिपदमाशावधिं को गतः।।

**I** **एकपदेन उत्तरत** **½ x 4 = 2**

**एक शब्द में उत्तर दें**

**Answer in one word only**

(i) शती किं वाञ्छति?

(ii) क्षितिपालतां कः इच्छति?

(iii) ब्रह्मा किं पदम् अभिलषति?

(iv) हरिपदं कः इच्छति?

**II** **पूर्णवाक्येन उत्तरत** **1 x 2 = 2**

**पूरे वाक्य में उत्तर दें**

**Answer in a complete sentence**

(i) चक्रेशः किम् वाञ्छति?

(ii) लक्षं कः वष्टि?

III ‘सीमा’ इत्यर्थे अत्र किं पदं प्रयुक्तम्? 1

IV ‘धनी’ इत्यस्य विलोमपदम् अत्र किं प्रयुक्तम्? 1

12. **मञ्जूषायां प्रदत्तैः उचितशब्दैः रिक्तस्थानपूर्तिः क्रियताम्** **1 x 4 = 4**

**मञ्जूषा में दिए गए उचित शब्दों से खाली स्थान भरें**

**Fill in the blanks with suitable words given in the box**

(i) प्रलयपयोधिजले (i)----------- वेदम्।
विहितवहित्रविचित्रमखेदम्।।
केशव (ii) ---------------। जय जगदीश हरे।।

(ii) तरुच्छाया (iii) ---------------यदपि तपसो योग्यमशनं
फलं वा मूलं वा तदपि न (iv) ---------------- इह वः।।

**मञ्जूषा**

| |
|---|
| पराधीनम्, धृतवानसि |
| तोयम्, धृतमीनशरीर |

**13 अधोदत्तः वाक्यांशः केन कं प्रति उक्तः?** **1 + 1**

**निम्नलिखित वाक्य किसने किसे कहा?**

**By whom and to whom the following sentence has been said?**

I ''प्रजाभिस्तु बन्धुमन्तः राजानः न ज्ञातिभिः।

II ''हंसधवला ज्योत्स्ना त्र्यम्बकोत्तमाङ्गात् गङ्गेव धरण्यामपतत्'' 1 x 2 = 2

(i) एषा पंक्तिः कस्मात् ग्रन्थात् सङ्कलिता?

(ii) अस्य ग्रन्थस्य कः लेखकः?

**14 अधोलिखितानां पङ्क्तीनां शुद्धं भावार्थं चित्वा लिखत** **1½ x 1½ = 3**

**अधोलिखित पंक्तियों का शुद्ध भावार्थ चुनकर लिखें**

**Write and select the suitable explanations of the following lines**

**I क्षितिरतिविपुलतरे तिष्ठति तव पृष्ठे।**

(i) (हे मत्स्यावतार!) तव पृष्ठभागः पृथ्वीतः अपि विशालतरः अस्ति।

(ii) (हे वराहावतार!) भूमेः पृष्ठभागः तव विशाले शरीरे दृश्यते।

(iii) (हे कूर्मावतार!) तव अतिविशाले पृष्ठभागे भूमिः स्थिता अस्ति।

**II मयूखैः जगतः स्नेहं पेपीयते रविः।**

(i) सूर्यः ग्रीष्मकाले स्वकिरणैः विश्वस्य प्रेमरसं पिबति।

(ii) सूर्यः ग्रीष्मकाले स्वकिरणैः संसारस्य आर्द्रतां शोषयति।

(iii) ग्रीष्मर्तौ सूर्यस्य उदये जलं शुष्यति।

**15 अधोलिखितश्लोकयोः अन्वयम् उचितपदैः पूरयित्वा पुनः लिखत** **2 + 2 = 4**

**नीचे लिखे श्लोकों के अन्वय उचित पदों से भरकर पुनः लिखें।**

**Complete the prose order reordering of both the Shlokas and rewrite them in the answersheet**

**I अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसन्ति**

**तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्यटामि।।** **½ x 4 = 2**

अस्मिन् (i) --------- अगस्त्यप्रमुखाः (ii) --------- उद्गीथविदः वसन्ति। तेभ्यः, निगमान्तविद्यां (iii) --------- वाल्मीकिपार्श्वात् (iv)---------- पर्यटामि।

**II** **शारदानि च माल्यानि वासांसि विमलानि च**

**शरत्काले प्रशस्यन्ते प्रदोषे चेन्दुरश्मयः।।** **½ x 4 = 2**

अन्वयः- शरत्काले (i)----------माल्यानि (ii)----------- च वासांसि (iii) --------------- च इन्दुरश्मयः (iv) --------------।।

**1 6 अधोलिखितानां 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह उचितं संयोजनं कुरुत** **1 x 4 = 4**

**नीचे लिखे 'क' स्तम्भ के वाक्यांशों को 'ख' स्तम्भ के वाक्यांशों के साथ उचित मिलान करें**

**Match the sentences of 'क' column with 'ख' column. This match should be a suitable one.**

| | 'क' | | 'ख' |
|---|---|---|---|
| i. | मुनिजनेनोद्ध्र्वं विप्रकीर्णैः प्रणामाञ्जलिसलिलैः | (अ) | पूर्वावधीरितं श्रेयो दुःखाय परिवर्तते |
| ii. | श्रीजयदेवकवेरिदमु-दितमुदारम् | (ब) | वर्जयेदन्नापानानि शिशिरे शीतलानि च |
| iii. | कटुतिक्तकषायाणि वातलानि लघूनि च | (स) | क्षाल्यमान इवागलत् संध्यारागः |
| iv. | मनोरथाय नाशंसे किं बाहो! स्पन्दसे वृथा | (स) | शृणु शुभदं सुखदं भवसारम् |

**17. अधोलिखितपङ्क्तिषु स्थूलाक्षरपदानां प्रसङ्गानुसारं शुद्धम् अर्थं चित्वा लिखत**

**नीचे लिखी पंक्तियों में स्थूलाक्षरपदों के प्रसङ्गानुसार शुद्ध अर्थ चुनकर लिखें**

**Select and write the suitable meaning of the bold words with proper reference in the following lines**

(i) परिणते दिवसे **शकुनयः** तरुशिखरेषु स्थितिमकुर्वन्।

(i) पक्षिणः (ii) दुर्योधनस्य मातुलः (iii) गृध्रः

(ii) विहगाः **क्षीणफलं** वृक्षं त्यजन्ति।

(i) अल्पफलम् (ii) हीनफलम् (iii) बहुफलम्

(iii) एनं **बालमृगेन्द्रं** मुञ्च

(i) बालसिंहम् (ii) मृगशावकम् (iii) मृगाणां समूहम्

(iv) स्नपयसि **पयसि** शमितभवतापम्।

(i) जले (ii) दुग्धे (iii) सरोवरे

# खण्डः 'घ' (Section D)
# भागः (II) (Part- II)
# सामान्यसंस्कृतसाहित्यपरिचयः 10
# (General introduction of Sanskrit literature)

**18. मञ्जूषायां प्रदत्तैः उचितशब्दैः अधोलिखितां तालिकां पूरयित्वा पुनः लिखत** 1 x 10 = 10
**मञ्जूषा में दिए गए उचित पदों से नीचे लिखी तालिका भरकर पुनः लिखें**
**Rewrite and complete the following columns. Select the words from the box**

| | कविः | देशः | कालः | काचिदेका कृतिः |
|---|---|---|---|---|
| (i) | कालिदासः | उज्जयिनी | (i) ----------- | (ii) ----------- |
| (ii) | जयदेवः | (iii) ----------- | द्वादशी शताब्दी | (iv) ----------- |
| (iii) | बाणभट्टः | (v) ----------- | (vi) ----------- | कादम्बरी |
| (iv) | भर्तृहरिः | (vii) ----------- | षष्ठी शताब्दी | (viii) ----------- |
| (v) | भवभूतिः | पद्मपुरम् | (ix) ----------- | (x) ----------- |

**मञ्जूषा**

उत्तररामचरितम्, प्रीतिकूटः ग्रामः,
उज्जयिनी, नीतिशतकम्,
गीतगोविन्दम्, शताब्दी, सप्तमी,
बङ्गप्रदेशः, अभिज्ञानशाकुन्तलम्,
प्रथमा शताब्दी ई पूर्वम्, सप्तमी शताब्दी

**अथवा (या) (OR)**

**18.अ बाणभट्टस्य जीवनविषयकः कृतिविषयकः च सामान्यपरिचयः हिन्दीभाषया/ आंग्ल-भाषया दीयताम्** 2 + 3 = 5
**बाणभट्ट की जीवनी तथा रचनाओं से सम्बन्धित सामान्य परिचय हिन्दी या अंग्रेजी में दें।**
**Write the life sketch and about the words of Banbhatt in Hindi or in English.**

**ब. कोष्ठकात् उचितं शब्दं विचित्य रिक्तस्थानानि पूरयत** 1 x 5 = 5
**कोष्ठक से उचित शब्द चुनकर खाली स्थान भरें**
**Fill in the blanks with suitable words from the bracket**

(i) ----------- गेयता वर्तते। (पद्ये/नाटके)
(ii) अभिनयः ----------- प्रधानम् अङ्गम्। (गद्यस्य/नाटकस्य)
(iii) छन्दसां प्रयोगः ------------ दृश्यते। (पद्ये/गद्ये)
(iv) संस्कृतमहाकाव्यानां विभजनं ------------- भवति। (सर्गेषु/अध्यायेषु)
(v) गद्यपद्यमयी रचना ------------- कथ्यते। (आरव्यायिका/चम्पू)

# आदर्शप्रश्नपत्रम् सं.–2 (2006)
# अङ्कयोजना
# विषयः संस्कृतम् (केन्द्रिकम्)

कक्षा–द्वादश | कोडसंख्या–322

अवधिः – होरात्रयम् | पूर्णाङ्काः – 100

## खण्डः 'क'
## अपठितांश–अवबोधनम् 10
### अस्मिन् खण्डे 82 शब्दानाम् एकः सरलः अपठितः गद्यांशः अस्ति।

**प्रश्नाः**

| क्रमाङ्कः | उद्देश्यम् | प्रश्न–प्रकारः | अपेक्षित–उत्तराणि | अङ्क–सङ्केतः | अङ्क–विभागः |
|---|---|---|---|---|---|
| I | तथ्यबोध–परीक्षणम् | अतिलघूत्तरः (एकपदेन) | i)स्वप्राणान् | ½ | |
| | | | ii) वीरभूमिः | ½ | |
| | | | iii) वीराः | ½ | |
| | | | iv) स्वार्थम् | ½ | 2 |
| II | तथ्यबोधपरीक्षणम् | लघूत्तरः (पूर्णवाक्येन) | i) येषां हृदये राष्ट्रभावना नास्ति तेषां हृदयं पाषाणतुल्यम् | 1 | |
| | | | ii) राष्ट्रसंरक्षणाय परस्परम् ऐक्यभावनाया महती आवश्यकता वर्तते। | 1 | 2 |
| III | भाषिकतत्त्व–प्रयोगपरीक्षणम् | अतिलघूत्तरः (एकपदेन) | भारतीयानाम् कृते | 1 | 1 |
| IV | भाषिकतत्त्व–प्रयोगपरीक्षणम् | अतिलघूत्तरः (एकपदेन) | | | |
| | | i) विशेष्यचयनम् | जन्मभूमिः | 1 | |
| | | ii) विलोमपदचयनम् | उन्नतिः | 1 | |
| | | iii) पर्यायपदचयनम् | जननी | 1 | 3 |
| V | शीर्षकप्रदानम् | अतिलघूत्तरः | i) देशभक्तिः | | |
| | | | ii) देशाय समर्पणम् | | 2 |
| | | | iii) जन्मभूमिः | | |
| | | | (अथवा अन्यत् किमपि उपयुक्तं शीर्षकम्) | | 10 |

# खण्डः 'ख'

(संस्कृतेन रचनात्मककार्यम्)

अङ्कयोजना 5+5+5 15

अस्मिन् खण्डे त्रयः प्रश्नाः सन्ति। प्रथमप्रश्ने लिखिते पत्रे मञ्जूषातः चित्वा विभिन्नरिक्तस्थानानां पूर्तिः करणीया। दशरिक्तस्थानानि सन्ति। प्रतिशुद्धरिक्तस्थानपूर्तिकृते अर्धः ½ अङ्कः निर्धारितः।

| क्रमाङ्कः | उद्देश्यम् | प्रश्न–प्रकारः | अपेक्षित–उत्तराणि | अङ्क–सङ्केतः | अङ्क–विभागः |
|---|---|---|---|---|---|
| 2. | पत्रलेखने औपचारिककार्यपरीक्षणम् | यस्मात् नगरात् पत्रं प्रेषितं तस्य नाम | 1. दिल्लीतः | ½ | |
| | | सम्बोधनपदम् | 2. प्रिय | ½ | |
| | | पत्रप्रेषकस्य अभिधानम् | 9. कनिष्कः | ½ | |
| | | पत्रसङ्केते यत्र पत्रं प्रेष्यते तस्य स्थानस्य नाम | 10. पञ्चापप्रदेशः | ½ | |
| | पत्रलेखने विषयवस्तु–बोधपरीक्षणम् | सन्दर्भानुकूलं विषयवस्तुज्ञानम् (रिक्तस्थानपूर्तिः) | 3. अस्मिन् | ½ | |
| | | | 4. शोभायात्रा | ½ | |
| | | | 5. समक्षम् | ½ | |
| | | | 6. सुसज्जितानि | ½ | |
| | | | 7. प्रदर्शनम् | ½ | |
| | | | 8. परिदृश्येन | ½ | 5 |

3. अस्मिन् प्रश्ने प्रदत्तायां कथायां सन्दर्भानुकूलं रिक्तस्थानपूर्तिः अपेक्षिता। अत्र दशरिक्तस्थानानि सन्ति। प्रतिशुद्धरिक्तस्थानपूर्तिकृते अर्धः (½) अङ्कः निर्धारितः। उत्तरसङ्केताः मञ्जूषातः एव ग्रहीतव्याः

| | | | | |
|---|---|---|---|---|
| कथायां सन्दर्भानुकूलं रिक्तस्थानपूर्तिः शब्दप्रयोगपरीक्षणम् | | (i) चत्वारः | ½ | |
| | | (ii) कलहम् | ½ | |
| | | (iii) श्रेष्ठी | ½ | |
| | | (iv) रज्ज्वा | ½ | |
| | | (v) त्रोटयितुम् | ½ | |
| | | (vi) अस्थापयत् | ½ | |
| | | (vii) सरलतया | ½ | |
| | | (viii) पुत्रान् | ½ | |
| | | (ix) निवत्स्यथ | ½ | |
| | | (x) संघे | ½ | 5 |

4. कमपि एकं विषयम् अधिकृत्य पञ्चवाक्येषु लेखनम् अपेक्षितम् (प्रतिवाक्यम् एकः अङ्कः निर्धारितः, अर्धः अङ्कः शुद्धतथ्यकृते अर्धः च शुद्ध-भाषाप्रयोगाय)

| | | | |
|---|---|---|---|
| अवबोधपूर्वकम् | वाक्यनिर्माणम् | छात्राः प्रदत्तशब्दैः | ½+½ |
| वाक्यसंरचना-परीक्षणम् | | वाक्यरचनां करिष्यन्ति | ½+½ |
| | | प्रतिवाक्यम् अर्धः अङ्कः | ½+½ |
| | | शुद्धतथ्यार्थम्, अर्धः | ½+½ |
| | | अङ्कः च भाषाप्रयोगाय | ½+½ |

5

15

# खण्डः 'ग'

# अनुप्रयुक्तव्याकरणम् 30

## अस्मिन् खण्डे भाषायाः व्यावहारिकप्रयोगः अपेक्षितः

**प्रश्नाः**

| क्रमाङ्कः | उद्देश्यम् | प्रश्न-प्रकारः | अपेक्षित-उत्तराणि | अङ्क-सङ्केतः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 5 | वाक्येषु पाठाधारित-सन्धिच्छेदपरीक्षणम् | अनुप्रयोगात्मकः कोष्ठान्तर्गतपदानां सन्धिच्छेदः बोधपरकः, अतिलघूत्तरः | (i) अचिरात् + च | 1 | |
| | | | (ii) ऋतौ + ऋतौ | 1 | |
| | | | (iii) हंसैः + इव | 1 | |
| | | | (iv) पल्लव + अर्घ्येण | 1 | |
| | | | (v) सहसा + एव | 1 | |
| | | | (vi) जगत् + ईश | 1 | |
| | | | | | 6 |
| 6 | वाक्येषु समस्तपदानां विग्रहदक्षतापरीक्षणम् | वाक्येषु स्थूलाक्षरपदानां विग्रहः | (i) चन्द्रस्य उदयः | 1 | |
| | | | (ii) निर्मलाः गुणाः | 1 | |
| | | | (iii) क्षीणानि फलानि यस्य तम् | 1 | |
| | | | (iv) अध्ययने प्रत्यूहः | 1 | |
| | | | (v) बालः चासौ मृगेन्द्रः तम् | 1 | |
| | | | (vi) इच्छाम् अनतिक्रम्य | 1 | |
| | | | | | 6 |
| 7 | वाक्ये कृदन्तपदानां प्रयोगपरीक्षणम् | प्रकृतिप्रत्ययौ योजयित्वा वाक्यसन्दर्भानुसारं रिक्तस्थानपूर्तिः | (i) परिणतः | 1 | |
| | | | (ii) क्षाल्यमानः | 1 | |
| | | | (iii) धृतवान् | 1 | |
| | | | (iv) जयते | 1 | |

| | | | | | |
|---|---|---|---|---|---|
| | | | (v) विहृत्य | 1 | |
| | वाक्ये तद्धितपदानां प्रयोगपरीक्षणम् | प्रकृतिप्रत्ययौ योजयित्वा वाक्यसन्दर्भानुसारं रिक्तस्थानपूर्तिः | (vi) अन्धकारताम् | 1 | |
| | | | (vii) बली | 1 | |
| | | | (viii) भगवति | 1 | |
| | | | | | 8 |
| 8 | वाक्येषु कर्ता-क्रिया-अन्वितिः विशेषण-विशेष्य-अन्वितिः | वस्तुनिष्ठः (प्रदत्तविकल्पेषु शुद्धविकल्पचयनेन रिक्तस्थानपूर्तिः) | (i) अगच्छत् | 1 | |
| | | | (ii) कलयसि | 1 | |
| | | | (iii) कुप्यन्ति | 1 | |
| | | | (iv) दास्यामि | 1 | |
| | | | (v) करोतु | 1 | |
| | | | | | 5 |
| 9 | उपपदविभक्तिप्रयोग-परीक्षणम् (प्रयोगात्मकः) | वस्तुनिष्ठः (कोष्ठकप्रदत्तेन शब्देन उचिताम् उपपदविभक्तिम् प्रयुज्य रिक्तस्थानपूर्तिः | (i) पुत्रे | 1 | |
| | | | (ii) ज्ञानम् | 1 | |
| | | | (iii) मे/मह्यम् | 1 | |
| | | | (iv) गगनतलम् | 1 | |
| | | | (v) पातकैः | 1 | |
| | | | | | 5 |
| | | | | | 30 |

अङ्क-योजना

# खण्डः घ भागः (i)

# पठितांश-अवबोधनम्

## अस्मिन् खण्डे सर्वे प्रश्नाः पाठ्यपुस्तकम् आधारिताः

## (वाङ्मयी भागः - II)

**प्रश्नाः**

| **क्रमाङ्कः** | **उद्देश्यम्** | **प्रश्न-प्रकारः** | **अपेक्षित-उत्तराणि** | **अङ्क-सङ्केतः** | **अङ्क-विभागः** |
|---|---|---|---|---|---|
| 10 | पठितगद्यांश-बोधपरीक्षणम् | I. अतिलघूत्तरः एकपदेन उत्तरम् | (i) पित्रा | ½ | |
| | | | (ii) वैद्यान् | ½ | |
| | | | (iii) रसायनः | ½ | |
| | | | (iv) पितुः | ½ | 2 |
| | | II लघूत्तरः पूर्णवाक्येन उत्तरम् | (i) स्वधाम गत्वा सः कतिचित् कवलान् अगृह्णात्। | 1 | |
| | | | (ii) पृष्टः वैद्यकुमारः अकथयत् श्वः प्रभाते यथाऽवस्थितम् आवेदयिष्यामि। | 1 | 2 |

| | | | | | |
|---|---|---|---|---|---|
| | भाषिकतत्त्वप्रयोग- | III विशेष्यपदचयनम् | 'निशाम्' इति विशेष्यम् | 1 | |
| | परीक्षणम् | IV सर्वनामस्थाने संज्ञा-प्रयोगः | 'वैद्यानाम्' कृते | 1 | 2 |
| | | **अथवा** | | | |
| | पठितनाट्यांश बोधपरीक्षणम् | I अतिलघूत्तरः एकपदेन | (i) ऋषिजनेन<br>(ii) बालमृगेन्द्रम्<br>(iii) वाचामात्रेण<br>(iv) उटजे | ½<br>½<br>½<br>½ | |
| | | II लघूत्तरः पूर्णवाक्येन उत्तरम् | (i) तापसी बालक्रीडार्थं तस्मै क्रीडनकं/मृत्तिकामयूरं दत्तवती। | 1 | |
| | | | (ii) राज्ञः मनः औरस इव पुत्रे तस्मिन् बाले स्निह्यति। | 1 | 2 |
| | भाषिकतत्त्व-प्रयोग- | III विलोमचयनम् | अनपत्यता | 1 | 1 |
| | परीक्षणम् | IV सर्वनामस्थाने संज्ञा-प्रयोगः | बालसिंहाय | 1 | 1 |
| 11 | पठितपद्यं-बोधपरीक्षणम् | अतिलघूत्तरः<br>I. एकपदेन उत्तरम् | (i) दशशतं<br>(ii) लक्षेशः<br>(iii) शैवपदम्<br>(iv) शिवः | ½<br>½<br>½<br>½ | |
| | | लघूत्तरः<br>II. पूर्णवाक्येन उत्तरम् | (i) चक्रेशः इन्द्रपदं प्राप्तुं वाञ्छति।<br>(ii) सहस्राधिपः लक्षं वष्टि | 1<br>1 | <br>2 |
| | भाषिकतत्त्व-प्रयोग-परीक्षणम् | III पर्यायपद-चयनम् | (iii) अवधिः | 1 | 1 |
| | | IV विलोमचयनम् | (iv) निःस्वः | 1 | 1 |
| 12 | पठितपद्यांश-बोधपरीक्षणम् | अतिलघूत्तरः | I. (i) धृतवानसि<br>(ii) धृतमीनशरीर<br>II. (i) तोयम्<br>(ii) पराधीनम् | 1<br>1<br>1<br>1 | <br><br><br>4 |

| | | | | | |
|---|---|---|---|---|---|
| 13 | उद्धृत-अंशस्य सप्रसङ्गसन्दर्भलेखनम् | अतिलघूत्तरः | I. (i) प्रभाकरवर्धनेन | 1 | |
| | | | (ii) पुत्रम् (हर्षवर्धनम्) | 1 | |
| | | | II. (i) कादम्बरीतः | 1 | |
| | | | (ii) बाणभट्टः | 1 | 4 |
| 14 | भावार्थबोधपरीक्षणम् | प्रदत्तविकल्पेभ्यः शुद्ध-भावार्थ-चयनम् | (i) हे कूर्मावतार! तव अतिविशाले पृष्ठ-भागे भूमिः स्थिता अस्ति। | 1 | 3 |
| | | | (ii) सूर्यः ग्रीष्मकाले स्वकिरणैः संसारस्य आर्द्रतां शोषयति | 1 | |
| 15 | पद्यंस्य अन्वय-परीक्षणम् | प्रदत्तेषु अन्वयेषु श्लोकं पठित्वा रिक्तस्थानपूर्तिः | I (i) प्रदेशे | ½ | |
| | | | (ii) भूयांसः | ½ | |
| | | | (iii) अधिगन्तुम् | ½ | 1½ |
| | | | (iv) इह | ½ | |
| | | | II (i) शारदानि | ½ | |
| | | | (ii) विमलानि | ½ | |
| | | | (iii) प्रदोषे | ½ | |
| | | | (iv) प्रशस्यन्ते | ½ | |
| 16 | वाक्यांशानां सार्थकसंयोजनम् | सार्थकसंयोजनम् | (i) क्षाल्यमान इवागलत् संध्यारागः। | 1 | |
| | | | (ii) शृणु शुभदं सुखदं भवसारम्। | 1 | |
| | | | (iii) वर्जयेदन्नपानानि शिशिरे शीतलानि च। | 1 | |
| | | | (iv) पूर्वावधीरितं श्रेयो दुःखाय परिवर्तते। | 1 | 4 |
| 17 | प्रसङ्गानुसारम् शब्दार्थबोधपरीक्षणम् | प्रदत्तविकल्पेभ्यः शुद्ध-अर्थ-चयनम् | (i) पक्षिणः | 1 | |
| | | | (ii) हीन-फलम् | 1 | |
| | | | (iii) बालसिंहम् | 1 | |
| | | | (iv) जले | 1 | 4 |

# खण्डः घ

## भागः (II)

## सामान्यसंस्कृतसाहित्यपरिचयः 10

| | | | | | |
|---|---|---|---|---|---|
| 18 | संस्कृतसाहित्यस्य सामान्यज्ञानम् | अतिलघूत्तरः (रिक्तस्थानपूर्तिः) | (i) प्रथमा शताब्दी | 1 | |
| | | | (ii) अभिज्ञानशाकुन्तलम्/ अन्या काचित् | 1 | |
| | | | (iii) बङ्गप्रदेशः | 1 | |
| | | | (iv) गीतगोविन्दम् | 1 | |
| | | | (v) प्रीतिकूटः ग्रामः | 1 | |
| | | | (vi) सप्तमी शताब्दी | 1 | |
| | | | (vii) उज्जयिनी | 1 | |
| | | | (viii) नीतिशतकम्/शतकत्रयम् | 1 | |
| | | | (ix) सप्तमी शताब्दी | 1 | |
| | | | (x) उत्तररामचरितम् | 1 | |
| | | | | | 10 |

**अथवा**

| | | | | | |
|---|---|---|---|---|---|
| घ.(ii) अ I | पाठ्यपुस्तकम् आधृत्य बाणभट्टस्य जीवनविषयकः कृतिविषयकः च सामान्यपरिचयः हिन्दीभाषया/आंग्लभाषया लेखनीयः | | | 5 | |
| घ(ii) अ II | उद्देश्यम् गद्य-पद्य नाटक-चम्पू- आदीनां परिभाषा- ज्ञान-परीक्षणम्। | अतिलघूत्तरः | (i) पद्ये | 1 | |
| | | | (ii) नाटकस्य | 1 | |
| | | | (iii) पद्ये | 1 | |
| | | | (iv) सर्गेषु | 1 | |
| | | | (v) चम्पू | 1 | 5 |
| | | | | | 10 |

# आदर्शप्रश्नपत्रं सं.-2 (2006)
# पाठ्यक्रमपरिशीलनम्
# (Coverage of Syllabus)

कक्षा-द्वादश — पाठ्यपुस्तकम्-वाङ्मयी भागः ll

## खण्डः क
## अपठितांश-अवबोधनम्

| क्रमाङ्कः | प्रश्नसंख्या | विषयः | | अङ्काः |
|---|---|---|---|---|
| 1 | | अपठितः अनुच्छेदः (82 शब्दाः) | | |
| | | (i) एकपदेन उत्तरम् (चत्वारः प्रश्नाः) | ½ x 4 = | 2 |
| | | (ii) पूर्णवाक्येन उत्तरम् (द्वौ प्रश्नौ) | 1 x 2 = | 2 |
| | | (iii) भाषिककार्यम् (एकः प्रश्नः) (सर्वनामस्थाने संज्ञाप्रयोगः) | 1 x 1 = | 1 |
| | | (iv) भाषिककार्यम् | | |
| | | (1) विशेषणचयनम् | | |
| | | (2) विलोमपदचयनम् | | |
| | | (3) पर्यायवाचिचयनम् | 1 x 3 = | 3 |
| | | (v) शीर्षकप्रदानम् | | 2 |
| | | | | 10 |

## खण्डः ख
## संस्कृतेन रचनात्मकं लेखनम्
## पत्रलेखनम् (अनौपचारिकपत्रम्)

| | | | | |
|---|---|---|---|---|
| 2 | | (मित्रं प्रति पत्रम्) रिक्तस्थानपूर्तिमाध्यमेन | | |
| | | (i) औपचारिककार्यपरीक्षणम् | ½ x 4= | 2 |
| | | (ii) बोधपरीक्षणम् | ½ x 6= | 3 |
| 3 | | कथायां मञ्जूषातः चित्वा रिक्तस्थानपूर्तिः (कथायां सन्दर्भानुकूलं बोध-परीक्षणम्) | | |
| | | मञ्जूषातः चित्वा प्रतिशब्दपूर्तिकृते एकः अङ्कः | 1x5= | 5 |
| 4 | | एकम् विषयम् | | |
| | | अधिकृत्य पञ्चवाक्यलेखनम् | 5 | 15 |

## खण्डः ग

## अनुप्रयुक्तव्याकरणम्

| | | | | |
|---|---|---|---|---|
| 5 | | संधिविच्छेदः | 1x6= | 6 |
| 6 | | समस्तपदानां विग्रहः<br>(अनुप्रयोगात्मकः) | 1x6= | 6 |
| 7 | | अनुप्रयोगात्मकरूपेण<br>प्रकृतिप्रत्ययप्रयोग-<br>परीक्षणम् | (I) 1x5= | 5 |
| | | | (II) 1x3= | 3 |
| 8 | | अन्वितिः<br>कर्ता-क्रिया-अन्वितिः।<br>विशेषण-विशेष्य-अन्वितिः | 1x5= | 5 |
| 9 | | उपपदविभक्तिप्रयोगः | 1x5= | 5 |

## खण्डः घ

## भागः (I) पठितांश-अवबोधनम् 35

| | | | | |
|---|---|---|---|---|
| 10 | | विषयः | पाठ-संख्या | |
| | घ(i)अ | गद्यांशः 'पितुर्वात्सल्यम्'<br>क्षणमात्रं च --------- निशामनैषीत् | 12 | 6 |
| | | **अथवा** | | |
| 11 | | नाट्यांशः 'भरतः सर्वदमनः'<br>जृम्भस्व--------- तमस्योपहर | 11 | 6 |
| 12 | | पद्यपाठः 'पद्यपीयूषम्'<br>निःस्वो---------- गतः | 10 | 6 |
| 13 | | प्रदत्तपद्यांशे रिक्तस्थानपूर्तिः | | |
| | | I. प्रलयपयोधि ----------- हरे। | 14 | |
| | | II. तरुच्छाया ----------- इह वः। | 13 | 4 |
| 13 | | I. वाक्यांशः केन कं प्रति उक्तः<br>प्रजाभिः ------------- ज्ञातिभिः | 11 | |

| | | | |
|---|---|---|---|
| | II. हंसघवला ----------- अपतत्<br>कस्मात् ग्रन्थात् सङ्कलिता एषा<br>पंक्तिः कः च अस्य लेखकः | 8 | |
| 14 | भावबोधनम् | | |
| | (i) क्षितिरतिविपुल---------पृष्ठे। | 14 | 1½ |
| | (ii) मयूखैः ----------- रविः। | 9 | 1½ |
| 15 | अन्वये रिक्तस्थानपूर्तिः<br>(i) सत्सङ्गमः<br>अस्मिन् ----------- पर्यटामि | 13 | 2 |
| | (ii) ऋतुचर्या<br>शारदानि ------------- रश्मयः | 09 | 2 |
| 16 | वाक्यांशानां सार्थकसंयोजनम् | | |
| | (i) मुनिजनेन ------------- रागः | 08 | |
| | (ii) श्रीजय ------------- भवसारम् | 14 | |
| | (iii) कटुतिक्त ----------- शीतलानि च | 09 | |
| | (iv) मनोरथाय ----------- परिवर्तते | 11 | |
| 17 | पदानाम् अर्थलेखनम् | | |
| | (i) शकुनयः | 08 | |
| | (ii) क्षीणफलम् | 10 | |
| | (iii) बालमृगेन्द्र | 11 | |
| | (iv) पयसि | 14 | |
| | | | 4 |

## खण्डः घ भागः (II)
## सामान्यः संस्कृतसाहित्यपरिचयः 10

| | | | |
|---|---|---|---|
| 18 | रिक्तस्थानपूर्तिः (मञ्जूषातः चित्वा)<br>प्रतिशुद्धपूर्तिकृते एकः अङ्कः | 1x10= | 10 |
| | **अथवा** | | |
| | (i) सामान्यः संस्कृतसाहित्यपरिचयः<br>(बाणभट्टस्य जीवनविषयकः कृतिविषयकः च सामान्यः परिचयः) | 5 | 5 |
| | (ii) रिक्तस्थानपूर्तिमाध्यमेन गद्य-पद्य-नाटकादिविधानां मुख्यविशेषतानां परिचयः | 1x5= | 5 |

# आदर्शप्रश्नपत्रम्–1

# संस्कृतम् (ऐच्छिकम्)

# कोड संख्या 022

## द्वादश–कक्षा

## Class -XII

**अवधिः होरात्रयम्** — **पूर्णांकाः 100**
**समय – तीन घण्टे** — **पूर्णांङ्क 100**
**Time - 3 hours** — **Total marks 100**

अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
इस प्रश्नपत्र में चार खण्ड हैं।
This Question paper has four sections

खण्डः (क) अपठितांश–अवबोधनम् — 15 अंकाः
Setion A: Reading Comprehension

खण्डः (ख) संस्कृतेन रचनात्मककार्यम् — 20 अंकाः
Section B : Writing Skills in Sanskrit

खण्डः (ग) पठित–अवबोधनम् — 45 अंकाः
Section C : Text books

खण्डः (घ) छन्दोऽलङ्काराः — 20 अंकाः
Section D : Meters and figures of speech

निर्देशाः

**Instructions**

(1) उत्तराणि उत्तरपुस्तिकायाम् एव लेखनीयानि।
उत्तर उत्तरपुस्तिका में ही लिखें।
Write answers in the answer sheet.

(2) सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि।
जहां सङ्केत न हो वहां सभी प्रश्नों के उत्तर संस्कृत में ही लिखें।
If you do'nt find any instructions in any of the questions, answer those questions in Sanskrit.

# आदर्शसंस्कृतप्रश्नपत्रम् 2
# कक्षा - द्वादशी
# ऐच्छिकः पाठ्यक्रमः

**समयः घण्टात्रयम्** **पूर्णांकाः 100**

## खण्डः क
## Section A

(iii)
(iv)

## अपठित-अवबोधनम् 15
## Reading Comprehension

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत** 5

**निम्नलिखित अनुच्छेद को पढ़कर प्रश्नों के उत्तर दीजिए।**

**Read the following passage and answer the questions**

जीवने यावत् आदानं स्यात् प्रदानं ततोऽधिकम् इति कथ्यते विद्वद्भिः। जीवने वयं यावत् प्राप्नुमः तदपेक्षया अधिकम् अस्मामिः दातव्यम् इति अस्य तात्पर्यम्। केवलम् उपभोगेन, यः आनन्दः भवति, सः स्वकालिक एव। विद्यादानेन, धनदानेन, अन्नदानेन वा य आनन्दः भवति, स स्थायी। बहुकालानन्तरमपि तस्य स्मरणेन अस्माकं मनसि सन्तोष भवति, आनन्दः च सञ्जायते। अतः अधिकः आनन्दः अपेक्षितः चेत् अधिकाधिका जनसेवा करणीया।

I **प्रश्नाः**

**एकपदेन उत्तरत** ½x4=2

**एक शब्द में उत्तर दीजिए**

**Answer in one word only.**

(i) जीवने आदानात् किम् अधिकं स्यात् ?

(ii) उपभोगेन प्राप्तः आनन्दः कीदृशः भवति ?

(iii) दानेन प्राप्तः आनन्दः कीदृशः भवति ?

(iv) दानस्य स्मरणेन अस्माकं मनसि किं भवति ?

II **पूर्णवाक्येन उत्तरत** 1

**पूर्ण वाक्य में उत्तर दीजिए**

Answer in a complete sentence.

दानं कतिविधं भवति?

III **यथानिर्देशम् उत्तरत** **½x4=2**

**यथा निर्देश उत्तर दीजिए**

**Do as directed**

(i) 'बहुकाले व्यतीते अपि' इति कस्य पदस्य अर्थः ?

(ii) अधिकाधिका इति कस्या: विशेषणम् ?

(iii) आदानम् इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(iv) प्रदानं ततोऽधिकम् इत्यत्र तत: इति सर्वनामपदं कस्य स्थाने प्रयुक्तम् ?

**2. निम्ननलिखितम् अनुच्छेदं पठत, प्रश्नान् च उत्तरत** **10**

**निम्नलिखित अनुच्छेद को पढ़कर प्रश्नों के उत्तर दीजिए।**

**Read the following passage and answer the questions**

स्वामी शिवानन्दसरस्वती प्रसिद्ध: वैद्य: आसीत् 1स बहुनिर्मल-हृदय: अपि आसीत् 1 य कोऽपि तस्य आश्रमं प्रति आगच्छति स्म, स: तस्मै पुस्तकानि फलानि, धनं, मधुरभक्ष्यं वा दत्वा एव प्रेषयति स्म। एकदा एक: श्रेष्ठी तत्रागच्छत्। वैद्य: तस्मै अपि पुस्तकानि पञ्च रूप्यकाणि च दत्तवान्। तदा कश्चित् सज्जन: पृष्टवान् स्वामिन्! स:तु श्रेष्ठी। तस्य धनस्य आवश्यकता नास्ति। भवान् किमर्थं धनं दत्तवान् इति। स्वामी अवदत्-वत्स! जना: सर्वे वृक्षात् फलानि स्वीकृत्य खादन्ति। कदापि वृक्ष: तान् न पृच्छति यत् भवान् दरिद्र: उत धनिक इति। अत: अस्माकं हृदये अपि तादृश: भाव भवेत् । भेदभावम् परित्यज्य परोपकार: कर्तव्य:। वसुधैव कुटुम्बकम् इति भाव:। भाषणमात्रेण व्यवहार: न प्रचलिष्यति। वस्तुत: जनसेवा एव जनार्दनसेवा।

**प्रश्ना:**

**I एकपदेन उत्तरत** **½x4=2**

**एक शब्द में उत्तर दीजिए**

**Answer in one word only.**

(i) स्वामिन: आश्रमे एकदा क: आगच्छत् ?

(ii) जना: वृक्षात् किं स्वीकृत्य खादन्ति ?

(iii) किं परित्यज्य अस्माभि: परोपकार: कर्तव्य: ?

(iv) केषां सेवा एव जनार्दनसेवा ?

**II पूर्णवाक्येन उत्तरत।** **1x4=4**

**पूर्ण वाक्य में उत्तर दीजिए।**

Answer in a complete sentence.

(i) शिवानन्दस्वामी अभ्यागताय किं ददाति स्म?

(ii) वैद्य: श्रेष्ठिने किम् दत्तवान् ?

(iii) कश्चित् सज्जन: वैद्यं स्वामिनम् किम् अपृच्छत् ?

(iv) भाषणमात्रेण कस्य भावस्य प्रचार: न भवितुं शक्नोति ?

**III यथानिर्देशम् उत्तरत।** **½x4=2**

**यथा निर्देश उत्तर दीजिए।**

**Do as directed.**

(i) पञ्च इति कस्य पदस्य विशेषणम्?

(ii) दरिद्र: इति पदस्य किं विलोमपदं तस्मिन्नेव वाक्ये प्रयुक्तम् ?

(iii) तस्य धनस्य आवश्यकता नास्ति इत्यत्र तस्य इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(iv) बहुनिर्मलं हृदयं यस्य सः इति स्थाने किं पदमत्र प्रयुक्तम्?

**IV अनुच्छेदस्य कृते समुचितशीर्षकं लिखत** **2**

**अनुच्छेद के लिए समुचित शीर्षक लिखिए।**

**Write a suitable title for this passage.**

## खण्ड : ख 20

## Section B

## (रचनात्मककार्यम्)

## (Writing skills)

**3. अधोलिखितरूपरेखानुसारं दशवाक्यैः कथां वर्णयत** **10**

**अधोलिखित रूपरेखा के अनुसार दस वाक्यों में कथा लिखिए**

**Write the complete story in ten words based on the following outlines**

एकनाथः सुप्रसिद्धः विद्वान्। प्रतिदिनं गंगास्नानम्। कश्चन दुष्टः मुखात् उच्छिष्टपातनम्, अपशब्दभाषणम्, एकनाथः शान्तः। पुनः स्नानम् पुनः दुष्टेन असभ्यव्यवहारः। एकनाथस्य मौनधारणम् पुनः स्नानम्। एवमेव घटनाचक्र। सायंकालः जातः। दुष्टः श्रान्तः न तु एकनाथः। अन्ते दुष्टः पराजितः। चरणयोः पतित्वा क्षमायाचना। तथापि एकनाथः प्रसन्नः। अहो भवत्कारणात् अद्य शतं वारं स्नानम्। दुष्टः लज्जितः अन्ते मुक्तः भवति। क्षमा शस्त्रं करे यस्य, दुर्जनः किं करिष्यति?

**4 शाक-आपणस्य वर्णनं प्रदत्तसंकेतसूच्यनुसारं दशवाक्येषु कुरुत** 10

**सब्जी की दुकान का वर्णन दी गई सूची के अनुसार दस वाक्यों में कीजिए**

**Decritbe a vegetable shop in ten sentences based on the given list of words**

**सङ्केतसूची**

| |
|---|
| विविधाः शाकविक्रेतारः उच्चैः वदन्ति-आलुकानि स्वीकुर्वन्तु। मरीचिकाः, उर्वारुकानि, गृञ्जकानि। कूष्माण्डम्। अल्पेन मूल्येन दास्यामि। कारवेल्लानि स्वास्थ्यकराणि, महिलाः, जनाः आपणिकाः, स्यूते स्थापयान्ति। धनं प्रयच्छन्ति। विवादं कुर्वन्ति। मूल्यम्, किलोपरिमितस्य, अर्धकिलोपरिमितम्। |

## Section C
## खण्ड : ग
## पठित- अवबोधनम् 45
## (Text Book)

**5.** **अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत। निम्नलिखित गद्यांश, पद्य तथा नाट्याश को पढ़कर प्रश्नों के उत्तर दीजिए** **15**

**Read the following extracts form prose, poetry and drama and answer the questions.**

**अ** **गद्यांशः** **5**

अथ मण्डूकाभावे सर्पेणभिहितम्- 'भद्र! निःशेषितास्ते रिपवः तत् प्रयच्छ अन्यन्मे किञ्चित् भोजनं यतोऽहं त्वयाऽत्रानीतः। गंगदत्तः आह 'भद्र' कृतं त्वया मित्रकृत्यं तत्साम्प्रतं घटिकायन्त्रमार्गेण गम्यताम् इति। सर्पः आह, भो गङ्गदत्त! न सभ्यगभिहितं त्वया। मदीयबिलमन्येन रुद्धं भविष्यति। तस्मादत्रस्थस्य मे मण्डूकमेकैकं स्ववर्गीयं प्रयच्छ। नो चेत् सर्वानपि भक्षयिष्यामि इति।

तच्श्रुत्वा गङ्ग.दत्तो व्याकुलमनाः व्यचिन्तयत्, ''अहो किमेतन्मया कृतं सर्पमानयता?''

**प्रश्नाः**

**I** **एकपदेन उत्तरत** **½x4=2**

**एक शब्द में उत्तर दीजिए**

**Answer in one word only**

(i) सर्पः केन आनीतः आसीत् ?

(ii) केन मित्रकृत्यं कृतम् ?

(iii) सर्पस्य बिलम् केन रुद्धं भविष्यति ?

(iv) सर्पम् आनीय गंगदत्तस्य मनः कीदृशम् अभवत् ?

**II** **पूर्णवाक्येन उत्तरत** **1x1=1**

पूर्ण वाक्य में उत्तर दीजिए

Ansuwer in a complete sentence.

गङ्गदत्तः किं चिन्तयित्वा व्याकुलः भवति?

**III** **यथानिर्देशम् उत्तरत**

**यथानिर्देश उत्तर दीजिए**

Do as directed **½x4=2**

(i) समाप्ता इति कस्य पदस्य अर्थः?

(ii) अन्यथा इति स्थाने किम् अव्ययपदं प्रयुक्तम् ?

(iii) प्रयच्छ अन्यत् मे किञ्चिद् भोजनम् इत्यत्र मे इति सर्वनामपदं कस्मै प्रयुक्तम्?

(iv) कर्तृपदं चिनुत मदीयबिलदुर्गम् अन्येन रुद्धं भविष्यति ।

**पद्य:** **½x4=2**

पापान्निवारयति योजयते हिताय,
गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति, ददाति काले,
सन्मित्रलक्षणमिदं प्रवदन्ति सन्त:।।

**प्रश्ना:**

**I एकपदेन उत्तरत** **½x4=2**

**एक शब्द में उत्तर दीजिए**

**Answer in one word only**

(i) सन्मित्रं किम् प्रकटीकरोति ?

(ii) क: आपद्गतं न त्यजति?

(iii) मित्रम् अस्मान् कस्मात् निवारयति?

(iv) मित्रं कदा ददाति?

**II पूर्णवाक्येन उत्तरत** **1**

**पूर्ण वाक्य में उत्तर दें**

**Answer in a complete sentence**

सन्मित्रस्य लक्षणद्वयं लिखत

**III यथानिर्देशम् उत्तरत**

**यथानिर्देश उत्तर दें**

**Do as directed**

(i) प्रकटीकरोति इत्यस्य किं विलोमपदम्?

(ii) आपदि पतितम् इति कस्य पदस्य अर्थ:?

(iii) प्रवदन्ति इति क्रियापदस्य कर्ता क:?

(iv) इदम् इति कस्य पदस्य सार्वनामिकविशेषणम्?

**इ नाट्यांश:**

गौतमी जाते! अनया अभ्युपपत्या सूचिता ते भर्तुर्गेहे अनुभवितव्या राजलक्ष्मीरीति। (शकुन्तला व्रीडां रूपयति)

प्रथम: एह्येहि अभिषेकोत्तीर्णाय काश्यपाय वनस्पतिसेवां निवेदयाव:।

द्वितीय: तथा। (इति निष्क्रान्त:)

सख्यौ अये अनुपयुक्तभूषणोऽयं जन:। चित्रकर्मपरिचयेन अंगेषु ते आभरणविनियोगं कुर्व:।

शकुन्तला जाने वां नैपुण्यम्। (उभे नाट्येनालंकुरुत:) (तत: प्रविशति स्नानोत्तीर्ण: काश्यप:)

काश्यप: यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया।

**प्रश्ना:**

**I** **एकपदेन उत्तरत** **½x4=2**

**एक शब्द में उत्तर दें**

**Answer in one word only**

(I) शिष्यौ कस्मै वनस्पतिसेवां निवेदयितुम् इच्छत:?

(ii) सख्यौ कस्या: अंगेषु आभरणविनियोगं कुरुत:।

(iii) काश्यपस्य हृदयं कया संस्पृष्टम् ?

(iv) शकुन्तला कस्य गृहे राजलक्ष्मीम् अनुभविष्यति इति वनस्पतिसेवया सूचिता?

**II** **पूर्णवाक्येन उत्तरत** **1x1=1**

**पूर्ण वाक्य में उत्तर दें**

**Answer in a complete sentence**

सख्यौ कथं शकुन्तलाया: अंगेषु आभूषणविनियोगं कुरुत:?

**III** **यथानिर्देशम् उत्तरत**

**यथानिर्देशम् उत्तर दें**

**Do as directed**

(i) वाम् इति सर्वनामपदं काभ्याम् प्रयुक्तम् ?

(ii) काश्यपाय इति पदस्य किं विशेषणम् अत्र प्रयुक्तम्?

(iii) लज्जा इति स्थाने किं पदं प्रयुक्तम्?

(iv) उपयुक्तभूषण: इत्यस्य विलोमपदं चित्वा लिखत।

**6.** **शब्दार्थान् मेलयत** **½x4=2**

**शब्दों का अर्थो से मिलान कीजिए**

**Match the words according to their meanings**

| शब्दा: | अर्था: |
|---|---|
| अ विदग्धै: | (i) चुम्बकस्य अवयव: |
| आ अयस्कान्तशकल : | (ii) नीलकमलम् |
| इ उत्सङ्ग.: | (iii) विद्वद्भि: |
| ई कुवलयम् | (iv) क्रोड: |

**7.** **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत** **1x4=4**

**रेखाङ्कित शब्दों पर आधारित प्रश्न निर्माण कीजिए**

**Frame Questions based on the underlined words**

(i) <u>कर्मणि</u> एव अधिकार: ते

(ii) कर्म ज्ययो हि <u>अकर्मण:</u>

(iii) <u>कर्मणैव</u> हि संसिद्धिम् आस्थिता: जनकादय:

(iv) बुद्धियुक्तो जहातीह उभे <u>सुकृतदुष्कृते</u>।

**8.** **अधोलिखितयोः भावार्थयोः रिक्तस्थानपूर्तिं मञ्जूषासहायतया कुरुत** **3+3=6**

**निम्नलिखित भावार्थों में मञ्जूषा की सहायता से रिक्तस्थानपूर्त्ति कीजिए**

**Fill in the blanks in the following explanalions with the help of words given in the box**

(i) सः ईश्वरः गुरुशिष्यौ आवाम् रक्षतु,-----------पालनं करोतु, आवां शक्तिपूर्णानि------------कुर्मः। यत् किमपि वयं पठेम तत्--------भवेत् वयं परस्परं द्वेषं न कुर्याम।

(ii) इयं चपला लक्ष्मीः-----उन्मत्तमिव मत्वा उपहसति, यथा यथा च इयं चञ्चला ----------भवति, तथा तथा दीपस्य ज्योतिः इव------कर्माणि एव उद्गिरति।

**मञ्जूषा**

| |
|---|
| बुद्धिमन्तं, आवयोः, तेजस्वि, |
| दीप्ता, कर्माणि, मलिनानि |

**9.** **अधोलिखितयोः अन्वययोः रिक्तस्थानानि पूरयत** **1½x1½=3**

**निम्नलिखित अन्वयों मे रिक्तस्थानपूर्त्ति कीजिए**

**Fill in the blanks in the following prose-order renderings**

(i) प्रथमं दूयमानोऽपि वसिष्ठस्याज्ञया ततः।
कौशिकस्य करे राजा ददौ रामं सलक्ष्मणम्।।

**अन्वयः** प्रथमं दूयमानः अपि-------ततः वसिष्ठस्य आज्ञया ----------करे सलक्ष्मणम्----------ददौ।।

(ii) तत्र तीव्रेण तपसा तोषितादिन्दुशेखरात्।
सर्वविद्यामुखं तेन प्राप्तम् व्याकरणं नवम्।।

**अन्वयः** तत्र तेन तीव्रेण--------तोषितात् इन्दुशेखरात् ----------नवम् व्याकरणम्-------------।।

**10** **अधोलिखिताः पंक्तयः कस्य कवेः कस्मात् काव्यात् संकलिताः?** **½x10=5**

**निम्नलिखित पंक्तियाँ किस कवि के किस काव्य से ली गई हैं?**

**From which works of which poets, have the following lines been extracted?**

(i) भो भोः। किं प्रयोजनोऽयमश्वः परिवृतः पर्यटति?

(ii) तेन प्रणष्टमैन्द्रं तदस्मद् व्याकरणं भुवि।

(iii) दाता समः सत्यपर क्षमावानापरोपसेवी च भवत्यरोगः।

(iv) शिलाजतुतुलामद्यात्प्रमेहार्तः पुनर्नवः।

(v) अपरिणामोपशमो दारुणो लक्ष्मीमदः।

**11.** **यथानिर्देशम् उत्तरत** **1x5=5**

**यथानिर्देश उत्तर दें**

**Do as directed**

**I** **कः कम् कथयति?**

**कौन किसको कह रहा है?**

**Who is saying this to whom?**

(i) जाते! एष त आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुपस्थितः।

(ii) शत्रुमुन्मूलयेत्प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा।

(iii) सुलभसौख्यमिदानीं बालरवं भवति।

(iv) यज्ञरक्षणदक्षं मे क्षमं देहि।

(v) भोः भोः। तत्किमक्षत्रिया पृथिवी यदेवमुद्घोष्यते?

**II** **विशेष्यं चिनुत** **1x2=2**

**विशेष्य चुनिये**

**Select the Qualified (Noun)**

(i) राजा दशरथः महायज्ञम् अकरोत्।

(ii) अथ कालेन वर्षस्य शिष्यवर्गो महानभूत्।

**III** **कर्तृपदं चिनुत** **1x3=3**

**कर्त्ता चुनिये**

**Select the Subject.**

(i) खिन्नः पाणिनिः तपसे हिमालयं गतवान्।

(ii) जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।

(iii) पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुखैनवैः।।

## खण्डः 'घ'

## Section D

## छन्दोऽलङ्कारा: 10+10=20

## Meters and figures of Speech

**12** **अ. प्रश्नान् उत्तरत** **1x4=4**

**प्रश्नों के उत्तर दीजिए**

**Answer the questions**

(i) लघुवर्णस्य चिह्नं किं, गुरूवर्णस्य चिह्नं च किम् ?

(ii) कस्मिन् गणे अन्ते लघुवर्णः भवति?

(iii) छन्दसाम् इति पदे कः गणः?

(iv) 'उपजाति' छन्दसि प्रतिचरणं कति वर्णाः?

**आ** **अधोलिखितपरिभाषाः पूरयत** **1x3=3**

**निम्नलिखित परिभाषाएं पूर्ण कीजिए**

**Fill in the blanks in the following definitions.**

(i) उक्ता वसन्ततिलका-------- ------------

